# वैयाकरणसिद्धान्तकौमुदी

## स्त्रीप्रत्ययप्रकरणम् (२२)

## १९.०३.२०१३

# ५२४. ऊरूत्तरपदादौपम्ये (४.१.६९)

- पदद्वयम् । ऊरूत्तरपदात्, औपम्ये ।
- ‘ऊङुतः’ (४.१.६५) इत्यतः ‘ऊङ्’ इति अनुवर्तते ।
- उपमानवाचिपूर्वपदम् ऊरूत्तरपदं यत् प्रातिपदिकं तस्माद् ऊङ् स्यात् ।
- करभोरूः ।
- करभोरूरिति ।

# ५२५. संहितशफलक्षणवामादेश्च (४.१.७०)

- पदद्वयम् । संहित-शफ-लक्षण-वामादेः, च ।
- 'ऊङुतः' (४.१.६५) इत्यतः 'ऊङ्' इति, 'ऊरूत्तरपदादौपम्ये' (४.१.६९) इत्यतः 'ऊरूत्तरपदाद्' इति च अनुवर्तते ।
- अनौपम्यार्थं सूत्रम् ।
- संहितोरूः ।
- संहितोरूरिति ।
- सैव शफोरूः, शफौ खुरौ ताविव संश्लिष्टत्वादुपचारात् ।
- उपचारादिति ।

- लक्षणशब्दादर्शं आद्यच् लक्षणोरूः ।
- लक्षणशब्दादिति ।

- वामोरूः ।
- वामोरूरिति ।

# सहितसहाभ्यां चेति वक्तव्यम् (वा)

- हितेन सह सहितौ ऊरू यस्याः सा सहितोरूः ।
- सहेते इति सहौ ऊरू यस्याः सा सहोरूः ।
- यद्वा विद्यमानवचनस्य सहशब्दस्य ऊर्वतिशयप्रतिपादनाय प्रयोगः ।

# ५२६. संज्ञायाम् (४.१.७२)

- एकपदात्मकं सूत्रम् ।
- 'ऊङुतः' (४.१.६५) इत्यतः 'ऊङ्' इति, 'कद्रुकमण्डल्वोश्छन्दसि' (४.१.७१) इत्यतः 'कद्रुकमण्डल्वोः' इति च अनुवर्तते ।
- कद्रुकमण्डल्वोः संज्ञायां स्त्रियाम् ऊङ् स्यात् ।
- कद्रूः । कमण्डलूः ।
- संज्ञायां किम्?
- कद्रुः = कपिशवर्णयुक्तः। कमण्डलुः = चतुष्पाज्जातिवाचकः।
- अच्छन्दोऽर्थं वचनम् ।
- अच्छन्दोऽर्थमिति ।

# ५२७. शार्ङ्गरवाद्यञो ङीन् (४.१.७३)

- पदत्रयम् । शार्ङ्गरवादि, अञः, ङीन् ।
- ‘अजाद्यतष्टाप्’ (४.१.४) इत्यतः ‘अतः’ इति, ‘जातेरस्त्रीविषयादयोपधात्’ (४.१.६३) इत्यतः ‘जातेः’ इति च अनुवर्तते ।
- शार्ङ्गरवादेः, अञो योऽकारः तदन्ताच्च जातिवाचिनः ङीन् स्यात् ।
- शार्ङ्गरवी ।
- शार्ङ्गरवीति ।
- बैदी ।
- बैदीति ।

- ‘जातेः’ इत्यनुवृत्तेः पुंयोगे ङीषेव ।
- ‘नृनरयोर्वृद्धिश्च’ (ग) इति गणसूत्रम् ।
- नारी ।

# ५२८. यङश्चाप् (४.१.७४)

- पदद्वयम् । यङः, चाप् ।
- यङन्तात् स्त्रियां चाप् स्यात् ।
- यङिति ञ्यङ्ष्यङोः सामान्यग्रहणम् ।
- आम्बष्ठ्या ।
- आम्बष्ठ्येति ।
- कारीषगन्ध्या ।
- कारीषगन्ध्येति ।

# षाद्यञश्चाब्वाच्यः (वा)

- षाद्यञ इति ।
- शार्कराक्ष्या ।
- शर्कराक्षस्य अपत्यं स्त्री ।
- पौतिमाष्या ।
- पूतिमाषस्य अपत्यं स्त्री ।
- उभयत्र 'गर्गादिभ्यो यञ्' (४.१.१०५) इति यञ् ।

# ५२९. आवट्याच्च (४.१.७५)

- पदद्वयम् । आवट्यात्, च ।
- 'यङश्चाप्' (४.१.७४) इत्यतः 'चाप्' इति अनुवर्तते ।
- अस्मात् चाप् स्यात् ।
- 'यञश्च' (४.१.१६) इति ङीपोऽपवादः ।
- अवटशब्दो गर्गादिः, आवट्या ।
- अवटस्य अपत्यं स्त्री - गर्गादिभ्यो यञ् (४.१.१०५)।

# ५३०. तद्धिताः (४.१.७६)

- आ पञ्चमपरिसमाप्तेः अधिकारोऽयम् ।
- तद्धिताः इति ।

# ५३१. यूनस्तिः (४.१.७७)

- पदद्वयम् । यूनः, तिः ।
- ‘स्त्रियाम्’ (४.१.३) इति, ‘तद्धिताः’ (४.१.७६) इति अधिक्रियते ।
- युवन्शब्दात् तिप्रत्ययः स्यात्, स च तद्धितः ।
- नान्तलक्षणङीपोऽपवादः ।
- लिङ्गविशिष्टपरिभाषया सिद्धे तद्धिताधिकारः उत्तरार्थः ।
- युवतिः ।

- अनुपसर्जनादित्येव ।
- बहवो युवानो यस्यां सा बहुयुवा ।

- युवतीति तु यौतेः शत्रन्तात् ङीपि बोध्यम् ।
- युवतीति त्विति ।

# ५५२. प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा । (२.३.४६)

- कारकप्रकरणारम्भः ।
- नियतोपस्थितिकः प्रातिपदिकार्थः ।